# .. shrImad gItAsAraH ..

# ॥ श्रीमद् गीतासारः ॥

## Document Information

Text title : shrImadgItAsAra

File name : shrImadgItAsAra.itx

Category : gItA

Location : doc_giitaa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ श्रीमद् गीतासारः ॥

श्रीभगवानुवाच –
गीतासारं प्रवक्ष्यामि अर्जुनायोदितं पुरा ।
अष्टाङ्गयोगयुक्तात्मा सर्ववेदान्तपारगः ॥ १॥

आत्मलाभः परो नान्य आत्मा देहादिवर्जितः।
रूपादिहीनो देहान्तःकरणत्वादिलोचनम् ॥ २॥

विज्ञानरहितः प्राणः सुषुप्तोऽहं प्रतीयते ।
नाहमात्मा च दुःखादि संसारादिसमन्वयात् ॥ ३॥

विधूम इव दीप्तार्चिरादीप्त इव दीप्तिमान् ।
वैद्युतोऽग्निरिवाकाशे हृत्सङ्गे आत्मनाऽऽत्मनि ॥ ४॥

श्रोत्रादीनि न पश्यन्ति स्वं स्वमात्मानमात्मना ।
सर्वज्ञः सर्वदर्शी च क्षेत्रज्ञस्तानि पश्यति ॥ ५॥

सदा प्रकाशते ह्यात्मा पटे दीपो जलन्निव ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः ॥ ६॥

यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्चकम् ॥ ७॥

मनोबुद्धिरहङ्कारमव्यक्तं पुरुषस्तथा ।
प्रसंख्यानपराव्याप्तो विमुक्तो बन्धनैर्भवेत् ॥ ८॥

इन्द्रियग्राममखिलं मनसाभिनिवेश्य च ।
मनश्चैवाप्यहङ्कारे प्रतिष्ठाप्य च पाण्डव ॥ ९॥

अहङ्कारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ।
प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ॥ १०॥

नवद्वारमिदं गेहं तिसृणां पञ्चसाक्षिकम् ।
क्षेत्रज्ञाधिष्ठितं विद्वान् यो वेद स परः कविः ॥ ११॥

अश्वमेधसहस्राणि वाजपेयशतानि च ।
ज्ञानयज्ञस्य सर्वाणि कलां नार्हन्ति षोडशीम् ॥ १२॥

श्रीभगवानुवाच –
यमश्च नियमः पार्थ आसनं प्राणसंयमः ।
प्रत्याहारस्तथा ध्यानं धारणार्जुन सप्तमी ।
समाधिविधि चाष्टाङ्गो योग उक्तो विमुक्तये ॥ १३॥

कायेन मनसा वाचा सर्वभुतेषु सर्वदा ।
हिंसाविरामको धर्मो ह्यहिंसा परमं सुखम् ॥ १४॥

विधिना या भवेद्धिंसा सा त्वहिंसा प्रकीर्तिता ।
सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ १५॥

यच्च द्रव्यापहरणं चौर्याद्वाथ बलेन वा ।
स्तेयं तस्यानाचरणं अस्तेयं धर्मसाधनम् ॥ १६॥

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।
सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥ १७॥

द्रव्याणामप्यनादानमापत्स्वपि तथेच्छया ।
अपरिग्रहमित्याहुस्तं प्रयत्नेन वर्जयेत् ॥ १८॥

द्विधा शौचं मृज्जलाभ्यां बाह्यं भावादथान्तरम्।
यदृच्छालाभतस्तुष्टिः सन्तोषः सुखलक्षणम् ॥ १९॥

मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः ।
शरीरशोषणं वापि कृच्छ्रचान्द्रायणादिभिः ॥ २०॥

वेदान्तशतरुद्रीयप्रणवादि जपं बुधाः ।
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ॥ २१॥

स्तुतिस्मरणपूजादि वाङ्मनःकायकर्मभिः ।
अनिश्चला हरौ भक्तिरेतदीश्वरचिन्तनम् ॥ २२॥

आसनं स्वस्तिकं प्रोक्तं पद्ममर्धासनस्तथा ।
प्राणः स्वदेहजो वायुरारामस्तन्निरोधनम् ॥ २३॥

इन्द्रियाणां विचरतां विषयेषु त्वसत्स्विव ।
निरोधः प्रोच्यते सद्भिः प्रत्याहारस्तु पाण्डव ॥ २४॥

मूर्तामूर्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्तहरिं अमूर्तमपि चिन्तयेत् ॥ २५॥

अग्निमण्डलमध्यस्थो वायुर्देवश्चतुर्भुजः ।
शंखचक्रगदापद्मयुक्तः कौस्तुभसंयुतः ॥ २६॥

वनमाली कौस्तुभेन रतोऽहं ब्रह्मसंज्ञकः ।
धारणेत्युच्यते चेयं धार्यते यन्मनोलये ॥ २७॥

अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
अहं ब्रह्मास्मि वाक्याच्च ज्ञानान्मोक्षो भवेन्नृणाम् ॥ २८॥

श्रद्धयानन्दचैतन्यं लक्षयित्वा स्थितस्य च ।
ब्रह्माहमस्म्यहं ब्रह्म अहं-ब्रह्म-पदार्थयोः ॥ २९॥

हरिरुवाच –
गीतासारमिति प्रोक्तं विधिनापि मया तव ।
यः पठेत् श्रृणुयाद्वापि सोऽपि मोक्षमवाप्नुयात् ॥ ३०॥

इति ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
श्रीमद्गीतासारः समाप्तः ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrImad gItAsAraH ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*